International Journal of Sanskrit Research 2021; 7(5): 18-21

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 18-21
© 2021 IJSR
www.anantaajournal.com
Received: 16-06-2021
Accepted: 18-08-2021

**बुद्धदेवघोषः**
शोधछात्रः, विश्वभारती विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

**Corresponding Author:**
**बुद्धदेवघोषः**
शोधछात्रः, विश्वभारती विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

# सर्व्वरक्षणविद्या-सामान्यमेकमध्ययनम्

## बुद्धदेवघोषः

पौराणिकसमये लोकजीवनं अलौकिकतत्त्वैः पूर्णरूपेण प्रभवति स्म। अलौकिकम् अर्थात् जगतः भिन्नम् अद्भुतं विलक्षणं वा। जनाः विश्वसन्ति यत् जगति काचित् अदृश्यशक्तिरपि विद्यते या मानवीयगत्यापेक्षा भिन्ना भवति। एतादृश्यः अलौकिकशक्तयः मानवीयशक्तिभिः अतिव शक्तिशालिन्यः वर्तन्ते। यया शक्त्या मनुष्यः अलौकिकप्रतिभायाः अधिकारि भवति। तदा किमपि अलौकिकं कार्यं कर्तुं पारयति। अलौकिकतत्त्वसिद्धिभिः मानवाः रूपपरिवर्तनं भिन्नदेहे प्रवेशं च कर्तुं शक्नोति। पौराणिककथायाः वहुशः अभिप्रायः अलौकिकतत्त्वेषु आधारितः भवति। रूपपरिवर्तनं, परदेहे प्रवेशं, पशुपक्षिणां मानववत् व्यवहारः, भूत-प्रेताः, डाकिनी-योगीणी, वेतालः इत्यादयः अलौकिक-अभिप्रायाः पौराणिककथासु प्रतिपदे दृश्यन्ते। यथा संस्कृतसाहित्यकथासु नायकस्य सहायकरूपेण राक्षस-दैत्या-यक्षादयः अलौकिकप्राणिनः मिलन्ति, ये अतिप्राकृतप्राणिनः अपि कथ्यन्ते। अलौकिकं अर्थात् यत् न लौकिकम्, सामान्यं मानवीयव्यवहारात् कार्यात् च परम् अद्भुतं चमत्कारपूर्णम् च कृत्यं, यत् मनुष्यः स्वसाध्यसाधनाय सहायकरूपेण उपयोगं करोति।
श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायण-नारद-संवादे शकटभञ्जन-कवचन्यासो द्वादशोऽध्याये सर्व्वरक्षणं कवचं तथा सर्व्वरक्षणं विद्याया वर्णना प्राप्यते। एकदा भगवान् श्रीनारायणऋषिः अवदत् नारदं समीपे- एकदा नन्दपत्नी यशोदा स्वीयमन्दिरे उषित्वा क्षुदातुरं पुत्राय गोविन्दाय वक्षे आलिङ्ग स्तन्यं प्रायच्छत् तदा क्वाचित् वृद्धाः युवत्यः च गोपीकाः बालकाबालिकाभिः सह नन्दाश्रमम् आगच्छन्-

> एकदा मन्दिरे नन्द-पत्नी सानन्दपूर्व्वकम्।
> कृत्वा वक्षसि गोविन्दं क्षुधितञ्च स्तनं ददौ।।
> एतस्मिन्नन्तरे गोप्य आजग्मुर्नन्दमन्दिरम्।
> स्थविराश्च वयस्याश्च बालिका बालकाविताः।।[1]

श्रीहरेः स्तन्यपानेन अपरितृप्तावस्थायामं यशोदा तं पुत्रं शीघ्रं शय्यायाः स्थापयित्वा ताः गोपीकाः प्रणम्य ताभ्यः तैल-सिन्दुर-ताम्वुल-भूषणवस्त्रादि प्रायच्छत्। अस्मिन् काले मायामयः कृष्णरूपिबालकः क्षुधया रुदन् मायावलेन चरणं प्रसरति स्म। तदा तस्य चरणं प्रविणशकटे पतनमात्रमेव विशम्बरहरेः पदाघातेन शकटं चूर्णम् अभवत्। शकटे भग्ने सति तस्मात् शकटात् दधि-दुग्ध-घृत-नवनीत-आदीनि द्रव्यानि भूमौ अपतन्।

---

[1] ब्र.वै.पु.श्री.ख.-१२.१-३

तदा गोपीकादयः तद्दृष्ट्वा अतीव विस्मृताः जाताः। तेः भिताः सन्तः पलायितवन्तः। तदा यशोदा आगत्य शकटात् बालकं उद्धार्य्य गृहित्वा च स्तन्यप्रदानं कृतवती शोकेन च रोदितवती, तदा गोपजनाः शकटभग्नकारणविषये बालकान् जिज्ञासितवन्तः। तदा बालकाः अस्मिन् अद्भुदविषये गोपजनान् उत्तरन्ति स्म। हे गोपजनाः शृण्वन्तु- श्रीकृष्णस्य पदाघातेन शकटं भग्नं जातम्। ब्रजवासीनः एतत् श्रुत्वा हसितवन्तः। ते तानि वचनानि न विश्वस्य जल्पितवन्तः। तदन्तरं श्रेष्टबाह्मणाः तस्य नन्दपुत्रस्य स्वस्त्ययनादि कार्यं कृतवन्तः। तदा शिशोः शरिरे हस्तं प्रदाय स्वस्त्यकारी ब्राह्मणः कवचं पठितवान् यत्, हे विपेन्द्र! तस्मिन् सर्वरक्षणकवचविषये त्वां वदामि यत् – यदा जगन्नाथहरिः निद्रावस्थायां जलशायि आसीत् तदा मधुकैटभभयात् भिताय स्तुतिपरायनाय हरिनाभिपङ्कजस्थिताय ब्राह्मणे मायया कवचमिदं प्रदत्तम्। योगनिद्रा ब्रह्माणम् अवदत्, हे ब्रह्मण् ! मा विभेतु, स्थिते हरौ मयि च तव भयं नास्ति। सुखावस्थानं करतु-

न हि जग्म्युः प्रतीतिश्च मिथ्येत्युचुर्व्रजे व्रजाः।।
शिशोः स्वस्त्ययनं तूर्णं चक्रुर्व्राह्मणपुङ्गवाः।
हस्तं दत्त्वा शिशोर्गात्रे पपाठ कवचं द्विजः।।[2]

सर्व्वरक्षणं कवचं तथा सर्व्वरक्षणं विद्यायाः प्रसङ्गे उद्धृतमस्ति यत् –

वदामि तत् ते विपेन्द्र कवचं सर्व्वरक्षणम्।
यद्दत्तं मायाया पूर्णं ब्रह्मणे नाभिपङ्कजे।।
निद्रिते जगतीनाथे जले च जलशायिने।
भीताय स्त्ततिकर्त्रे च मधुकैटभयोर्भयात्।।[3]

तत् अनन्तरं भगवान् नारायणः सर्व्वरक्षणं कवचं तथा सर्व्वरक्षणं विद्याया परिपूर्णकरणे देवतानां दिकदर्शनविषये अवदत्-
उर्द्धेदेशे नारायणः अधोदेशे च कमलापतिः रक्षतु। पूर्वे गोपालः रक्षतु, अग्निकोणे च दशास्यहन्ता रक्षतु, नैऋर्ते त्वां वैकुण्ठः दक्षिणे वनमालिः, पश्चिमे वासुदेवः रक्षतु। वायुकोणे त्वां अजविष्टरश्रवा सदा रक्षतु, उत्तरे अनन्तशक्तिः भगवान् अनन्तरक्षतु। ईशाणकोणे इश्वरः रक्षतु। सर्वेषु स्थानेषु शत्रुजित् रक्षतु। जले स्थले अन्तरिक्षे निद्रां च राघवः त्वां रक्षतु-

ऊर्द्धे नारायणः पातु अधस्तात् कमलापति।
पातु पूर्व्वे च गोपालः पातु वह्नौ दशास्यहा।।
वनमाली पातु याम्यां वैकुण्ठः पातु नैर्ऋते।
वारुणे वासुदेवश्च पातु ते जलजासनः।।
पातु ते सम्ततमजो वायव्यां विष्टरश्रवाः।
उत्तरे च सदा पातु चानन्तोऽन्तकरः स्वयम्।।
ऐशान्यामीश्वरः पातु सर्व्वत्र पातु शत्रुजित्।
जले स्थले चान्तरीक्षे निद्रायां पातु राघवः।।
इत्येवं कथितं ब्रह्मन् कवचं परमाद्भुतम्।।[4]

सर्व्वरक्षणं कवचमं तथा सर्व्वरक्षणं विद्यायाः सिद्धिमन्त्रः – अनन्तरं भगवान् श्रीनारायणः अवदत् नारदं समीपे- हे ब्रह्मण् इदं परमम् अद्भुतं कवचं तव समीपे अवदन्। पूर्वं शम्भुना सह घोरसंग्रामकाले स्मरणमात्रमेव श्रीकृष्णः कृपया मह्यम् कवचमिदं प्रायच्छत्। मम कवचप्राप्ती मात्रमेव हरिः गगनस्थितः सन् मां रक्षितं प्रवृत्तः अभवत्। अहं पूर्वं शतवर्षं यावत् आकाशे शम्भासुरेण सह घोरं युद्धं कृत्वा यदा कवचमिदं प्राप्तवान्, तदा कवचस्य प्रभावेण सः असुरः भूतले पतितः सन् मृत्युः प्राप्तवान्। शुम्भे मृते सति कृपासागरः गोविन्दः आकाशमार्गे स्थित्वा मह्यं माल्यं कवचं च प्रादय गोपालं गतवान्। हे देवर्षे अस्य कल्पान्तरस्य वृतान्तं तव समीपे वर्णयामि स्म। अस्य कवचस्य प्रभावेन, अस्माकं स्थितात्वात् च तव किमपि भयं नास्ति-

दुरीभूतं कुरु भयं भयं किं ते हरौ स्थिते।
स्थितायां मयि च ब्रह्मन् सुखं तिष्ठ जगत्पते।।
श्रीहरिः पातु ते वक्त्रं मस्तकं मधुसूदनः।
श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः।।
कर्णयुग्मञ्चकण्ठञ्च कपालं पातु माधवः।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम्।
अधरोष्ठं हृषीकोशो दन्तपङ्क्तिं गदाग्रजः।
रासेश्वरश्च रसानां तालुकां वामनोऽवतु।।
वक्षः पातु मुकुन्दस्ते जठरं पातु दैत्यहा।
जनार्द्दनः पातु नाभिः पातु विष्णुश्च मेहनम्।।
नितम्वयुग्मं गुह्यञ्च पातु ते पुरुषोत्तमः।
जानुयुग्मं जानकीशः पातु ते सर्व्वदा विभुः।।
हस्तयुग्मं नृसिंहश्च पातु सर्व्वत्र सङ्कटे।
पादयुग्मं वराहश्च पातु वः सर्व्वदा विभुः।।[5]

---

[2] ब्र.वै.पु.श्री.ख.-१२.१-१४
[3] ब्र.वै.पु.श्री.ख.-१२.१५-१६
[4] ब्र.वै.पु.श्री.ख.-१२.२४-२७
[5] ब्र.वै.पु.श्रीकृ.ख.-१२.१७-२३

अर्थात् तव वदनं हरिः रक्षतु, मस्तकं मधुसूदनः रक्षतु, तव चक्षुद्वयं श्रीकृष्णः रक्षतु, नासिकां राधिकापतिः रक्षतु, माधवः तव कर्णयुगलं कण्ठं ललाटं च रक्षतु, गोविन्दः कपोलं रक्षतु, केशवस्वयं तव केशान् रक्षतु, तव अधरोष्ठं हृषिकेशः रक्षतु, दन्तपंक्तिं च गदाग्रजः रक्षतु, रासेश्वरः रसनां वामनतालुकां च रक्षतु, तव वक्षस्थलं मुकुन्दः रक्षतु, जठरं दत्त्वारि रक्षतु, नाभिं जनार्दनः रक्षतु, हनुदेशं विष्णुः रक्षतु,तव नितम्वं गुह्यं च पुरुषोत्तमः रक्षतु, जानुजुगलं प्रभुः जानकिपतिः सदा रक्षतु। सर्वेषु संकटेषु तव हस्तयुगलं नृसिंहः पदयुगलं च वराहः सदा रक्षतु।

सर्व्वरक्षणं कवचमं तथा सर्व्वरक्षणं विद्यायाः दाता ग्रहीता च -

भगवान् श्री योगनिद्रः सर्व्वरक्षणं कवचं तथा सर्व्वरक्षणं विद्यायाः दाता ग्रहीता च विषये श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायण-नारद-संवादे शकटभञ्जन-कवचन्यासो द्वादशोऽध्याये अकथितं यत्-

कृष्णेन कृपया दत्तं स्मृतेनैव पुरा मया।
शुम्भेन सह संग्रामे निलक्ष्ये घोरदारुणे।।
गगनस्थितो मयासद्यः प्राप्तिमात्रेण सज्जितः।
कवचस्य प्रभावेण धरण्यां पतितो मृतः।।
पूर्व्वं वर्षशतं खे च कृत्वा युद्धं भयावहम्।
मृते शुम्भे च गोविन्दः कृपालुर्गगने स्थितः।।
माल्यञ्च कवचं दत्त्वा गोलोकं स जगाम ह।।[6]

एवं च कवचस्य प्रभावविषये तदन्तरम् अवदत् –

आभ्यां तव भयं नास्ति कवचस्य प्रभावतः।
कोटिशः कोटिशो नष्टा मया दृष्टाश्च सर्व्वशः।।
अहञ्च हरिणा सार्द्धं कल्पे कल्पे स्थिरा सदा ।
इत्युक्त्वा कवचं दत्त्वा सान्तर्द्धानं चकार ह।।
निःशङ्को नाभिकमले तस्थौ स कमलोद्भवः।[7]

श्रीब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे नारायण-नारद-संवादे शकटभञ्जन-कवचन्यासो द्वादशोऽध्याये सर्व्वरक्षणं कवचस्य धारणे योगनिद्रो उक्ते पौराणिकप्रामान्यं यत्-

वद्धेदं कवचं कण्ठे शङ्करस्त्रिपुरं पुरा।
जघान लीलामात्रेण दुरन्तमसुरेश्वरम्।।
वद्धेदं कवचं काली रक्तवीजं चखाद सा।
सहस्रशीर्षा धृत्वेदं विश्वं धत्ते तिलं यथा।।
आवां सनत्कुमारश्च धर्म्मः साक्षी च कर्म्मणाम्।
कवचस्य प्रसादेन सर्व्वत्र जयिनो वयम्।।
न्यस्य नन्दशिशोः कण्ठे जगाम कवचं द्विजः।
आत्मनः कवचं कण्ठे दधार च स्वयं हरिः।।
प्रभावं कथितं सर्व्वं कवचस्य हरेस्तथा।
अनन्तस्याच्युतस्यैव प्रभावमतुलं मुने।।[8]

एवं च दुर्दान्त मधुकैटभः ब्रह्मणं हन्तुं उद्यतः अभवत् तदा ब्रह्मा अनेन स्तवेन निद्रां स्तुतौ कृतायाम् सत्यां महामायादुर्गा आविर्भुता सति दिव्यं सर्वरक्षणनामकं श्रीकृष्णकवचं प्रदाय अर्न्तहिता अभवत्। ब्रह्मा स्तवप्रभावेण श्रेष्टं कवचं अलभत्। कवचस्य प्रभावेण च अभयं प्राप्तवान् इति निश्चयः।

सर्व्वरक्षणं कवचधारणे स्थाननिर्देशनं लौकिकफलाफलं च – यः बुद्धिमानजनः कवचमिदं सुवर्णेन कन्दनं कृत्वा कण्ठे दक्षिणे हस्ते वाहु वा धारयति, तस्य विष-अग्नि-सर्प-शत्रुभ्यः च किमपि भयं न भवति। तथा च जले स्थले अन्तरिक्षे निद्रायां च ईश्वरः स्वयं तं रक्षति। मानवः अस्य कवचस्य प्रभावेण संग्रामे व्रजपाते विपत्तौ त्राणसंकटे च इत्यादौ निःशङ्कः भवति। पूर्वे इदं कवचं कण्ठे धृत्वा शिवः अवलीलाक्रमेण त्रिपुरासुरं हतवान्। देवी काली कवचमिदं धृत्वा रक्षावीजं भक्षितुं सक्षमा अभवत्। सहस्रशीर्षः अनन्तः कवचमिदं धृत्वा पृथिवीं तिलवत् मस्तके धारयति। सनत्कुमारः सर्वकर्मणः साक्षी धर्मः वयं च अस्य कवचस्य प्रभावेण सर्वत्र विजयिनः अभवाम-

सुवर्णगुटिकायान्तु कृत्वेदं कवचं परम्।
कण्ठे वा दक्षिणे वाहौ वध्नीयाद्यः सुधीः सदा।।
विषाग्नि-सर्प-शत्रुभ्यो भयं तस्य न विद्यते।
जले स्थले चान्तरीक्षे निद्रायां रक्षतीश्वरः।।
संग्रामे वज्रपाते च विपत्तौ प्राणसङ्कटे।
कवचस्य वलादेव सद्यो निःशङ्कतां व्रजेत्।।[9]

प्राचीनयुगे पुराणेषु विविधविद्यायाः वर्णना प्राप्यते यानि अतीव आश्चर्यजनकः चमत्कारी च यत् मानवजातिं चमत्कारीं करोति।

## सहायकग्रन्थतालिका

1. वन्द्योपाध्याय, अमलकुमार, १९७८, पौराणिका, विश्वकोषहिन्दुधर्म (1म, 2य, 3य भाग), फर्मा Klm Pvt Ltd, कलकाता।

[6] ब्र.वै.पु.श्री.ख.-१२.२८-३१
[7] ब्र.वै.पु.श्री.ख.-१२.३२-३४
[8] ब्र.वै.पु.श्री.ख.-१२.३८-४२
[9] ब्र.वै.पु.श्री.ख.-१२.३५-३७

2. शर्मा गिरिधर, १९५४, पुराणपारिजातः, चौखम्बा विद्याभवन, वाराणसी।
3. तर्करत्न,पञ्चानन(सम्पा.), १३९७, ब्रह्मवैवर्तपुराणम्, नवभारत पावलिशार्स, कोलकाता।
4. त्रिपाठी, श्रीकृष्णमणि, २०१२, पुराणपर्यालोचनम्, चौखम्वा सुरभारती प्रकाशन, वाराणसी।
5. आचार्य शर्मा, श्रीराम, १६७०, ब्रह्मवैवर्तपुराणम्, संस्कृति संस्थान, बरेली, उत्तरप्रदेश।